श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीगुरुपवनपुराधीशाय श्रीकृष्णाय परब्रह्मणे नमः

श्री मेल्पत्तूर् नारायणभट्टतिरेः कृतिषु

# ॥ श्रीमन्नारायणीये एकोनसप्ततितमं दशकम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीमन्नारायणीये एकोनसप्ततितमं दशकम् ॥

## रासक्रीडावर्णनम्

केशपाशधृतपिञ्छिकावितति सञ्चलन्मकरकुण्डलं
    हारजालवनमालिकाललितमङ्गरागघनसौरभम्।
पीतचेलधृतकाञ्चिकाञ्चितमुदञ्चदंशुमणिनूपुरं
    रासकेलिपरिभूषितं तव हि रूपमीश कलयामहे॥ **69.1** ॥

तावदेव कृतमण्डने कलितकञ्चुलीककुचमण्डले
    गण्डलोलमणिकुण्डले युवति मण्डलेऽथ परिमण्डले।
अन्तरा सकलसुन्दरीयुगलमिन्दिरारमण सञ्चरन्
    मञ्जुलां तदनु रासकेलिमयि कञ्जनाभ समुपादधाः॥ **69.2** ॥

वासुदेव तव भासमानमिह रासकेलिरससौरभं
    दूरतोऽपि खलु नारदागदितमाकलय्य कुतुकाकुला।
वेषभूषणविलासपेशलविलासिनीशतसमावृता
    नाकतो युगपदागता वियति वेगतोऽथ सुरमण्डली॥ **69.3** ॥

वेणुनादकृततानदानकलगानरागगतियोजना -
    लोभनीयमृदुपादपातकृततालमेलनमनोहरम्।
पाणिसङ्क्वणितकङ्कणं च मुहुरंसलम्बितकराम्बुजं
    श्रोणिबिम्बचलदम्बरं भजत रासकेलिरसडम्बरम्॥ **69.4** ॥

श्रद्धया विरचितानुगानकृततारतारमधुरस्वरे
    नर्तनेऽथ ललिताङ्गहारलुलिताङ्गहारमणिभूषणे।

सम्मदेन कृतपुष्पवर्षमलमुन्मिषद्दिविषदां कुलं
चिन्मये त्वयि निलीयमानमिव सम्मुमोह सवधूकुलम्॥ **69.5** ॥

स्विन्नसन्नतनुवल्लरी तदनु कापि नाम पशुपाङ्गना
कान्तमंसमवलम्बते स्म तव तान्तिभारमुकुलेक्षणा।
काचिदाचलितकुन्तला नवपटीरसारघनसौरभं
वञ्चनेन तव सञ्चुचुम्ब भुजमञ्चितोरुपुलकाङ्कुरा॥ **69.6** ॥

कापि गण्डभुवि सन्निधाय निजगण्डमाकुलितकुण्डलं
पुण्यपूरनिधिरन्ववाप तव पूगचर्वितरसामृतम्।
इन्दिराविहृतिमन्दिरं भुवनसुन्दरं हि नटनान्तरे
त्वामवाप्य दधुरङ्गनाः किमु न सम्मदोन्मददशान्तरम्॥ **69.7** ॥

गानमीश विरतं क्रमेण किल वाद्यमेलनमुपारतं
ब्रह्मसम्मदरसाकुलाः सदसि केवलं ननृतुरङ्गनाः।
नाविदन्नपि च नीविकां किमपि कुन्तलीमपि च कञ्चुलीं
ज्योतिषामपि कदम्बकं दिवि विलम्बितं किमपरं ब्रुवे॥ **69.8** ॥

मोदसीम्नि भुवनं विलाप्य विहृतिं समाप्य च ततो विभो
केलिसम्मृदितनिर्मलाङ्गनवघर्मलेशसुभगात्मनाम्।
मन्मथासहनचेतसां पशुपयोषितां सुकृतचोदित -
स्तावदाकलितमूर्तिरादधिथ मारवीरपरमोत्सवान्॥ **69.9** ॥

केलिभेदपरिलोलिताभिरतिलालिताभिरबलालिभिः
स्वैरमीश ननु सूरजापयसि चारुनाम विहृतिं व्यधाः।
काननेऽपि च विसारिशीतलकिशोरमारुतमनोहरे
सूनसौरभमये विलेसिथ विलासिनीशतविमोहनम्॥ **69.10** ॥

कामिनीरिति हि यामिनीषु खलु कामनीयकनिधे भवान्
पूर्णसम्मदरसार्णवं कमपि योगिगम्यमनुभावयन्।

ब्रह्मशङ्करमुखानपीह पशुपाङ्गनासु बहुमानयन्
भक्तलोकगमनीयरूप कमनीय कृष्ण परिपाहि माम्॥ **69.11** ॥

॥ इति श्रीमन्नारायणीये एकोनसप्ततितमं दशकं समाप्तम्॥